International Journal of Sanskrit Research 2021; 7(3): 108-113

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(3): 108-113
© 2021 IJSR
www.anantaajournal.com
Received: 12-03-2021
Accepted: 18-04-2021

**सुरेन्द्रचन्द्रत्रिपाठीः**
विद्यावारिधिछात्रः
श्रीश्रीविश्वविद्यालयः,
विद्याधरपुरम्, कटकम्,
ओडिशा, भारत

Corresponding Author:
**सुरेन्द्रचन्द्रत्रिपाठीः**
विद्यावारिधिछात्रः
श्रीश्रीविश्वविद्यालयः,
विद्याधरपुरम्, कटकम्,
ओडिशा, भारत

# तत्त्वाध्वानानुसरणम् - काश्मीरशैवपरम्परायां साङ्ख्यदर्शने च प्रदत्तानां तत्त्वानामनुशीलनम्

## सुरेन्द्रचन्द्रत्रिपाठीः

**शोधसारः**
दुःखत्रयात् मुक्तिः एव पुरुषस्य ध्येयः इति साङ्ख्यकारः भणति । तत्त्वज्ञानेन दुःखत्रयात् स्वां विमुच्य अमृतत्वं लभते नश्वरः मनुष्यः इति तत्र दृढोक्तिः दरीदृष्यते । ज्ञानेन हि बन्धात् विमुच्यते मनुष्यः । (Shastri, 1948) । पक्षान्तरे काश्मीरशैव परम्परायां "ज्ञानबन्धः" इति अतीवमहत्वपूर्णसूत्रं वर्तते । (Laxmanjoo, 2002. p. 18) । "अज्ञानबन्धः" इति श्लेषार्थमपि कर्तुं शक्नुमः अस्य सूत्रस्य । पुनश्च पञ्चविंशति तत्वानां व्याख्यानमुपलभ्यते साङ्ख्यहर्शने यत्र प्रकृतिपुरुषौ कालातीतौ तत्त्वौ । शैव परम्परायां तु षट्त्रिशत्तत्त्वानि वर्ण्यन्ते, तत्र आक्षितिपुरुषतत्त्वानि अशुद्धानि; मायया सह पञ्चकञ्चुकानि शुद्धाशुद्धतत्त्वानि; शिव, शक्ति, ईश्वर, सदाशिव, शुद्धविद्या च शुद्धतत्त्वानि (Laxmanjoo, 2003) । साङ्ख्यदर्शने पुरुषस्य किमपि कर्तृत्व नास्ति सृष्टिसर्जने, काश्मीरशैवदर्शने परमशिवः स्वेच्छायां सृष्टिं कामयति । तत्र एतादृशां बाह्यवैषम्यानां तर्कपूर्वकविचारविमर्शः, पन्थाद्वयोर्मध्ये का श्रेष्ठा अपि च सर्वोपरि तत्त्वानां संख्यागतासामञ्जस्यनिरूपणम् अस्य शोधपत्रस्य आशयः ।

**मूलपाठः** पादटिप्पणीसहितः

## प्रस्तावना

### काश्मीरशैवपरम्परा

काश्मीरप्रदेशः शिव-शक्ति-आराधनायाः प्रकृष्टस्थलम अस्ति । जगद्गुरुश्रीशङ्कराचार्येण सह तूलनीयः आचार्यः अभिनवगुप्तः, अलौकिकशिवसूत्राणां मन्त्रद्रष्टा श्रीवासुगुप्तः, प्रत्यभिज्ञापरम्परायाः स्रष्टा श्री उत्पलदेवः च अस्याः परम्परायाः मूलाः उद्घोषकाः । एतद्भिन्नैः बहुभिः ग्रन्थैः (ये उल्लिखितानां द्रष्टृणां चिन्ताधाराणां प्रेरणास्रोतस्वरूपेण उपलभ्यन्ते) ऋद्धिमन्ता इयं परम्परा । तेषु ग्रन्थेषु ये उल्लेखनीयाः ते यथा - रुद्रयामलः, विष्णुयामलः, ब्रह्मयामल, कृष्णयामल इत्यादयः । एषु सर्वेषु ग्रन्थेषु ये ये विन्दवः निश्चिततया उपलभ्यन्ते तेषां संक्षेपालोचनं सन्दर्भेऽस्मिन् क्रियते ।

काश्मीरशैवपरम्परा विलक्षणा, अनन्यलब्धा च भवेत् सति तस्याः सम्पर्कः वैदिकशास्त्रैः सार्द्धं अङ्गाङ्गीरूपे जडितः - यथा प्रस्फुटितपद्मपुष्पैः सह पङ्के लुक्कायिताः मृणालाः । अत्र काश्मीरशैवपरम्परारूपाणि पद्मपुष्पाणि मृणालरूपैः वैदिकशास्त्रै सह निरवच्छिन्नसात्विकचिन्ताधारारूपैः विससूत्रैः सम्पर्कितानि । केचन पण्डिताः काश्मीरशैवपरम्परायाः वैदिकशास्त्रपरम्पराभिः सम्पर्कमनस्वीकुर्वन्ति, किन्तु न तत् सम्यक्, यतः अस्याः परम्परायाः भित्तिः साङ्ख्यदर्शनस्य पङ्चविशति तत्वानि आधृत्य वर्तते । काश्मीरविद्वांसः साङ्ख्ये निरूपितानि तत्वानि सामग्रिकतया स्वीकृत्य, तत्रोपलब्धानि कानिचन तत्वानि अनस्वीकृत्य च षट्त्रिंशत्तत्त्वविशिष्टं चिन्ताराज्यं प्रतिष्ठितवन्तः यस्य समादरम् अधुना सर्वैः क्रियते ।

त्रिकम् नाम्नि अपि परम्परेयं परिज्ञायते । नर-शक्ति-शिवात्मकं त्रिकम् । अत्र पुनः तिस्रः शाखाः प्राप्यन्ते - द्वैतः, द्वैताद्वैतः, अद्वैतः च । द्वैते दशतन्त्राणि अन्तर्भवन्ति, द्वैताद्वैते अष्टादशतन्त्राणि अन्तर्भवन्ति, अद्वैते चतुःषष्ठीतन्त्राणि अन्तर्भवन्ति च । परन्तु अद्वैत एव त्रिकनाम्ना ज्ञायते यतः अत्रैव द्वैतः द्वैताद्वैतः च समावर्त्तते । अतः त्रिकमध्ये द्विनवसंख्यकानां तन्त्राणां समाहारं दृश्यते, शैवपरम्परा द्वैत-द्वैताद्वैत-अद्वैतानाम् अलौकिकं मेलनम् । शिवतत्वः द्वैतः, रुद्रतत्वः द्वैताद्वैतः, भैरवतत्वः अद्वैतः । आमर्दकः द्वैतवादस्य, श्रीनाथः द्वैताद्वैतवादस्य अपि च त्र्यम्बकनाथः अद्वैतत्रिकशास्त्रस्य द्रष्टारः [1] । परम्परायाः प्रसारं दीपाद्दीपं इवोदितम् (यथा एकात् दीपात् ज्योतिः अन्यं दीपं प्रतिगच्छति तद्वत् ) अभवत् ।

काश्मीरशैवदर्शनैः सम्बद्धानि शास्त्राणि त्रिधा विभज्यते - (1) आगमशास्त्राणि (2) स्पन्दशास्त्राणि (3) प्रत्यभिज्ञाशास्त्राणि च । तत्र आगमशास्त्राणि तन्त्राधारितानि, प्रत्यभिज्ञाशास्त्राणि ज्ञानाधारिताद्वैतशास्त्राणि, स्पन्दशास्त्राणि प्रयोगात्मकानि साधनामूलकानि च । आगमशास्त्रवत् अत्र सिद्धान्तनिरूपणं न दृश्यते, परपक्षस्य खण्डनं स्वपक्षस्य मण्डनमपि नास्ति । स्पन्दसूत्राणि शिवसूत्रोपरि आधृताः । शिवसूत्रं सैद्धान्तिकम्, स्पन्दसूत्रं प्रायोगिकम् । शिवसूत्रं वसुगुप्तेन उद्धृतं, स्पन्दसूत्रं तेनैव विरचितम् ।

काश्मीरशैवपरम्परायाः मूलभितिः अपि त्रिधा विभज्यते (क) षट्त्रिंशत्तत्वानि (ख) षडाध्वानम् (ग) मातृकाचक्रः च ।

**षट्त्रिंशत्तत्वानि**

साङ्ख्यकारिकायां पञ्चविशति तत्वानां वर्णनं दीयते । तत्रोपरि एकादशतत्वानां संयोगात् षट्त्रिंशत्तत्त्वानि सम्भवन्ति । एतानि तत्त्वानि त्रिधा विभज्यन्ते यथा - (१) पञ्चशुद्धतत्त्वानि, (२) षट्शुद्धाशुद्धतत्त्वानि, (३) पञ्चविशति-अशुद्धतत्त्वानि । तृतीयभागे प्रदत्तानि अशुद्धतत्त्वानि एव साङ्ख्यकारिकायाः प्रतिपादितानि । षट्त्रिंशत्तत्त्वानां संक्षेपालोचनम् अधोभागे प्रदत्तम् ।

**(क)** अशुद्धतत्वानि [2]

पञ्चमहाभूतानि, यथा - १. क्षितिः, २. अप्, ३. तेजः, ४. मरुत्, ५. व्योमः

पञ्चतन्मात्राणि, यथा - ६. गन्धः, ७. रसः, ८. रूपम्, ९. स्पर्शः, १०. शब्दः

पञ्चकर्मेन्द्रियाणि, यथा - ११.उपस्थः, १२. पायुः, १३. पादौ, १४. पाणौ, १५. वाक्

पञ्चज्ञानेन्द्रियाणि, यथा - १६. घ्राणेन्द्रियः (नासिका), १७. रसनेन्द्रियः (जिह्वा), १८. स्पर्शेन्द्रियः (त्वक्), १९. दर्शनेन्द्रियः (**चक्षू**), २०. श्रवणेन्द्रियः(कर्णौ) २१-२३: अन्तःकरणत्रयम्, यथा - २१.मनः, २२.बुद्धिः, २३.अहंकारः २४: प्रकृतिः २५: पुरुषः

**(ख) षट्कञ्चुकानि -**

शुद्धाशुद्धतत्वानि यथा - २६.नियतिः, २७.कालः, २८. रागः,, २९. विद्या, ३०. कला, ३१. माया

**(ग) शुद्धतत्वानि** [3],

शुद्धविद्या (अहम्-अहम्, इदम्-इदम् इति भावसन्निविष्टा), ३३. ईश्वरः (इदम्-अहम् इति भावसन्निविष्टः), ३४. सदाशिवः (अहम्-इदम् इति भावसन्निविष्टम्), ३५. शक्तिः (इदम् इति भावसन्निविष्टा), ३६.शिवः (अहम् इति भावसन्निविष्टः)

**षडाध्वानम्** [4] **-**

**(क) वाच्याध्वाः (स्थूल-सूक्ष्म-परा)**

१. भुवनाध्वानः (स्थूल) - ११८ भुवनानि

---

[1] (मालिनी - January-September, 2020, Page 47)

[2] (Laxmanjoo, 2003)

[3] (Mishra. p 64)

[4] (Mishra. p 68)

२. तत्वाध्वानः (सूक्ष्म) - ३६ तत्वानि

३. कलाध्वानः (परा) [5] - निवृत्तिकला, प्रतिष्ठाकला, विद्याकला, शान्तकला सनातनकला च।

**(ख) वाचकाध्वाः (स्थूल-सूक्ष्म-परा)**

४. पदाध्वानः (स्थूलः) - वाक्यानि

५. मन्त्राध्वानः (सूक्ष्मः) - पदानि

६. वर्णाध्वानः (परा) - वर्णाः

**मातृकाचक्रः (वर्णमातृका)**

(क) शिवतत्वः (स्वराः) (अधिष्ठात्री देवी - महालक्ष्मी) शक्तयः - (1) चित्शक्तिः (2) आनन्दशक्तिः (3) इच्छाशक्तिः (4) ज्ञानशक्तिः (5) क्रियाशक्तिः । एते शक्तयः षोडशस्वरवर्णैः प्रकटीभवन्ति। यथा -

(1) चित्शक्तिः - अ (अनुत्तरः), सूर्य, प्रमाण

(2) आनन्दशक्तिः - आ, सोम, प्रमेय

(3) इच्छाशक्तिः - इ, ई (अक्षुब्ध-इच्छाशक्तिः - इ, क्षुब्ध-इच्छाशक्तिः - ई), सूर्य-सोम, प्रमाण-प्रमेय

(4) ज्ञानशक्तिः - उ, ऊ (उन्मेष-ज्ञानशक्तिः - उ, ऊनता-ज्ञानशक्तिः - ऊ), सूर्य-सोम, प्रमाण-प्रमेय

- ऋ, ॠ, ऌ, ॡ अमृतबीज । अस्याम् अवस्थायां शिवः - अनाश्रितशिवः - इत्युच्यते । स्वं सृष्टिकार्यात् पृथक्करोति शिवः अत्र।

सूर्य-सोम- सूर्य-अग्नि, प्रमेय-प्रमेय-प्रमेय-प्रमाता

(5) क्रियाशक्तिः अस्फुटक्रियाशक्तिः (अ, आ + इ, ई = ए)

- स्फुटक्रियाशक्तिः (अ,आ + ए = ऐ)
- स्फुटतरक्रियाशक्तिः (अ,आ + उ,ऊ = ओ)
- स्फुटतमक्रियाशक्तिः (अ,आ + ओ = औ)
- सोम-सोम-सोम-सोम, -प्रमेय-प्रमेय-प्रमेय-प्रमेय

अनुस्वारः = शिवावस्थायाः द्योतकः

विसर्गः = शिवविन्दुः + शक्तिविन्दुः

(ख) शक्तितत्वः [6]

क-वर्गः - महाभूतानि (अधिष्ठात्री देवी - ब्राह्मी)

अ, आ + मुख्यतया चित्-शक्तिः (अनुत्तर) = ङ (आकाशतत्वः)

अ, आ + मुख्यतया आनन्द - शक्तिः = घ (वायुतत्वः)

अ, आ + मुख्यतया इच्छा-शक्तिः = ग (अग्नितत्वः)

अ, आ + मुख्यतया ज्ञान-शक्तिः = ख (जलतत्वः)

अ, आ + मुख्यतया क्रिया-शक्तिः = क (पृथ्वीतत्वः)

च-वर्गः - तन्मात्राणि (अधिष्ठात्री देवी - माहेश्वरी)

इ, ई + मुख्यतया चित्-शक्तिः (अनुत्तर) = ञ (शब्द)

इ, ई + मुख्यतया आनन्द-शक्तिः = झ (स्पर्श)

इ, ई + मुख्यतया इच्छा-शक्तिः = ज (रूप)

इ, ई + मुख्यतया ज्ञान-शक्तिः = छ (रस)

इ, ई + मुख्यतया क्रिया-शक्तिः = च (गन्ध)

ट-वर्गः - कर्मेन्द्रियाणि (अधिष्ठात्री देवी - कौमारी )

ऋ, ॠ (अनाश्रितशिवः) + मुख्यतया चित्-शक्तिः (अनुत्तर) = ण (वाक्)

ऋ, ॠ (अनाश्रितशिवः) + मुख्यतया आनन्द-शक्तिः = ढ (पाणि)

ऋ, ॠ (अनाश्रितशिवः) + मुख्यतया इच्छा-शक्तिः = ड (पाद)

ऋ, ॠ (अनाश्रितशिवः) + मुख्यतया ज्ञान-शक्तिः = ठ (पायु)

ऋ, ॠ (अनाश्रितशिवः) + मुख्यतया क्रिया-शक्तिः = ट (उपस्थ)

त-वर्गः - ज्ञानेन्द्रियाणि (अधिष्ठात्री देवी - वैष्णवी)

ऌ, ॡ (अनाश्रितशिवः) + मुख्यतया चित्-शक्तिः (अनुत्तर) = न (श्रोत्र)

ऌ, ॡ (अनाश्रितशिवः) + मुख्यतया आनन्द-शक्तिः = ध (त्वक्)

ऌ, ॡ (अनाश्रितशिवः) + मुख्यतया इच्छा-शक्तिः = द (चक्षु)

ऌ, ॡ (अनाश्रितशिवः) + मुख्यतया ज्ञान-शक्तिः = थ (रसना)

ऌ, ॡ (अनाश्रितशिवः) + मुख्यतया क्रिया-शक्तिः = त (घ्राण)

प-वर्गः - अन्तःकरणानि, प्रकृतिः, पुरुषः च (अधिष्ठात्री देवी - वाराही )

[5] (Singh. P 136)
[6] (Mishra. p 43)

उ, ऊ + मुख्यतया चित्-शक्तिः (अनुत्तर) = म (पुरुषः)

उ, ऊ + मुख्यतया आनन्द-शक्तिः = भ (प्रकृतिः)

उ, ऊ + मुख्यतया इच्छा-शक्तिः = ब (बुद्धि)

उ, ऊ + मुख्यतया ज्ञान-शक्तिः = फ (अहंकारः)

उ, ऊ + मुख्यतया क्रिया-शक्तिः = प (मनः)

अन्तःस्थवर्णानि - (अधिष्ठात्री देवी - ऐन्द्री)

शुद्धाशुद्धतत्वानि - नियतिः, कालः, रागः, विद्या, कला, माया। षडेते पुनः चत्वारः भवन्ति, यथा -

(1) नियतिः रागः, (2) कालः कला, (3) विद्या, (4) माया

नियतिः + रागः = ल

कालः + कला = य

विद्या = र

माया = व

उष्माः - (अधिष्ठात्री देवी - चामुण्डा)

शुद्धविद्या = श

ईश्वरः = ष

सदाशिवः = स

शक्तिः = ह

षडाध्वानानि मुक्तिमार्गं प्रदर्शयन्ति । भुवनाध्वानमुसृत्य अष्टादशोत्तरशतसंख्यकभुवनान् क्रमशः गत्वा तेषु मार्गेषु कालान्तरे मुक्तिप्राप्तिः सम्भवति। अतीव कठिनोऽयं मार्गः। बहुजन्मव्याप्ता इयं यात्रा । तत्वाध्वाने निर्देशितः मार्गः भुवनाध्वाने निर्देशितमार्गात् सूक्ष्मतरः । अत्र षट्त्रिंशत्तत्वानां सम्यक् अवधारणं मुक्तिमार्गम् उन्मोचयति। वाच्याध्वे कलाध्वानः सूक्ष्मतमम् (परा) । तत्र पञ्चप्रकारककलानां सम्यक् ज्ञानं मुक्तिप्रदायकं भवति । ते यथा (१) निवृत्तिकला - पृथ्वीतत्व (२) प्रतिष्ठाकला - (जलतत्वात् प्रारभ्य प्रकृतितत्वपर्यन्तं 23 तत्वानां समाहारः) (३) विद्याकला - (पुरुष-नियति-काल-राग-विद्या-कला-माया-आदि सप्ततत्वानि) (४) शान्तकला - (शुद्धविद्या-ईश्वर-सदाशिव-शक्ति-आदि चतुस्तत्वानि) (५) सनातनकला - (शिवतत्वम्)। तथैव वाचकाध्वे गमनम् अपि मुक्तिप्रदायकं सिद्धयति । तत्राऽपि पदाध्वानः (स्थूलः), मन्त्राध्वानः (सूक्ष्मः) अपि च वर्णाध्वानः (परा) । वाचकाध्वः मन्त्रशक्तिम् आधृत्य प्रतिष्ठितः । वाक्य-पद-वर्णानां सटीकोपयोगं मुक्तिमार्गस्य द्योतकः भवति।

काश्मीरशैवपरम्परानुसारं परमशिवः अव्यक्तः । तस्य कार्याणि पञ्चविधानि यथा - (१) सृष्टिः (२) स्थितिः (३) लयः (४) निग्रहः (५) अनुग्रहः। जगतः सृजनं सृष्टिः, तस्य संरक्षणं स्थितिः, विनाशनं लयः, स्वस्य (परमशिवस्य) जगतः सृष्टेः अनिच्छुकता निग्रहः अपि च प्राणीनां प्रति कृपा अनुग्रहः । यद्यपि कश्मिंश्चित् अध्वाने गमनं मुक्तेः कारणं भवति, तथापि ईश्वरकृपाम् ऋते तद्गमनं न सम्भवति । एतत् कृपायाः (अनुग्रहस्य) बाहकः गुरुरेव भवति । ततः उक्तं च - गुरुरुपायः ॥ [7] यतः ज्ञानाहरणं (अज्ञानमपि) बन्धस्य कारणं भवति, (१. चैतन्यमात्मा ॥ २. ज्ञानं बन्धः ॥) [8] ततः ईश्वारानुग्रहात् एव मुक्तिः।

**साङ्ख्यपरम्परा -**

पञ्चविशतितत्त्वानां सम्यक् अध्ययनम् एव मुक्तिमार्गस्य द्योतकः इति साङ्ख्यदर्शने उल्लिखितम्[9]। अस्य दर्शनस्य मूलप्रवर्तकः कपिलमुनिः, परन्तु अधुना वयं सर्वे ईश्वरकृष्णविरचितसाङ्ख्यदर्शनं कपिलमुनेः प्रवर्तितसाङ्ख्यसूत्राणां निर्यासरूपे गृह्णामः । दर्शनेऽस्मिन् पृथिव्याः प्रारभ्य प्रकृति पर्यन्तं पञ्चविंशतितत्त्वानां आलोचनं विश्लेषणं च दीयते।

**पञ्चविशतितत्त्वानि -**

काश्मीरशैवपरम्परायां ये अशुद्धतत्त्वानि उल्लिखितानि (क) ते अत्र मूलभूततत्त्वसाररूपेण गृहीताः।

**प्रमाण -**

प्रमाणं त्रिविधम् इति अत्र स्वीकृतम्। "कतमाः पुनस्त्रिस्रो विधा इत्यत आह 'दृष्टमनुमानमाप्तवचन च' इति । एतच्च लौकिकप्रमाणाभिप्रायं, लोकव्युत्पादनार्थत्वाच्छास्त्रस्य तस्यैवात्राराधिकारात् ..." (Mishra, Vachaspati. Udaseen, Balram. 54).

**सत्कार्यवादः -**

सत्कार्यवादः साङ्ख्यदर्शने प्रमुखस्थानमलङ्करोति । (१) असत् अकरणात् (२) उपादानग्रहणात् (३) शक्यस्यशक्यकरणात् (४) कारणाभावात् इति अस्य विभाजनं।

---

[7] (Laxmanjoo, 2002. Pp 92-93)
[8] (Laxmanjoo, 2002. Pp 11-21)
[9] (Shastri, 1948)

**गुणत्रयम् -**

सत्वरजतमादित्रिगुणमयिप्रकृतिः । एतानां स्वल्पता बाहुल्य वा हेतोः पञ्चिकरणप्रभावात् च जगति भूतानां सृष्टिः सम्भवति । यथा प्रदीपेऽवस्थिताः वर्तितैलानलाः परस्परविरोधसंज्ञकाः अपि चेत् सुसमन्वयात् आलोकं ददति, तथैव सुव्यवस्थात् सत्वरजतमाः सर्जनक्षमाः भवन्ति।

**उत्पत्तिसर्गः - बुद्धिसर्गः**

मोक्षप्राप्तियावत् कारणशरीरः सृष्टि-स्थिति-लयचक्रे पुनः पुनः भूयः कार्यशरीरं गृह्णाति । प्रकृतिपुरुषयोः साक्षात्कारानन्तरं अस्य चक्रस्य पुनराविर्भावं न सम्भवति । तदेव मोक्ष इत्युच्यते । तदनन्तरं दुःखत्रयाणान् अवसानं भवति, जीवः पुनः जन्ममरणचक्रे न आपतति इत्यर्थः ।

**तत्त्वानुशीलनम् (FIG-1)**

काश्मीरशैवपरम्परायां साङ्ख्यदर्शने च पञ्चविंशतितत्त्वानां सहत्त्वं वर्ण्यते । साङ्ख्यदर्शने ईश्वरस्य उद्धरमं न दृश्यते । प्रकृति-पुरुषौ एव सृष्टि-स्थिति-लयानां कारणभूततत्त्वानि इति तत्र स्थिरीकृतानि । पुनः पुरुषस्य निर्विकारता-निर्गुणता-इत्यादिकारणात् तस्य उपस्थिति एव सृष्टेः कारण इति तत्र निर्धारितमस्ति । अर्थात् प्रकृतिः समस्तब्रह्माण्डम् आत्मसात् कृत्वा कारणशरीराणि निधाय च प्रलयं याति, पुनः स्वां प्रकटयति च । एतावत् प्रक्रिया अनन्तकालात् अद्यावधि प्रचलितः अस्ति, अनन्तकालयावत् चलिस्यति च । प्रकृतिपुरुषयोः दर्शनं प्राणीनां दुःखनिवृत्तेः हेतुः यतः परं तेषां मोक्षः सम्भवति ।

काश्मीरशैवपरम्परायां पञ्चविंशतितत्त्वानां प्राधान्यं सृष्टिप्रक्रियायां न स्वीकृतम् - अत्र परमशिवः सृष्टेः हेतुः इति स्वीकृतः । साङ्ख्यदर्शने उपलब्धानि पञ्चविंशतितत्त्वानि अशुद्धानि इति गृहीतानि अस्मिन् शास्त्रे । सृष्टेः इच्छा परमशिवे ३२.शुद्धविद्या (अहम्-अहम्, इदम्-इदम् इति भावसन्निविष्टा), ३३.ईश्वरः (इदम्-अहम् इति भावसन्निविष्टः), ३४.सदाशिवः (अहम्-इदम् इति भावसन्निविष्टम्), ३५.शक्तिः (इदम् इति भावसन्निविष्टा), ३६.शिवः (अहम् इति भावसन्निविष्टः) ।




**Fig 1:** अद्वैतवादः - काश्मीरशैवपरम्परायां, साङ्ख्यदर्शने च ।

## उपसंहारम्

काश्मीरशैवपरम्परा तन्त्रभित्तिका । तत्रोपलब्धानि निर्देशानि उपकरणरूपेभ्यः स्वीकृतानि । योऽपि एकनिष्ठचित्तेन अनुपालनं करोति सः निःसन्देहः ईप्सितं फलं प्रप्नोति इति नात्र द्विमतः । यद्यपि अस्याः परम्परायाः मूले वैदिकप्रथाः सन्ति, क्रमशः परम्परेयं भिन्नैकं स्वस्वातन्त्र्यं दृढीकृत्वा सर्वजनादृता भवति । भुवनाध्वे अष्टोत्तरशतसंख्यकानां भुवनानां उपस्थापनं नैकविश्वब्रह्माण्डसम्बद्धकुतुहलं (Theory of Multiverse) जागर्ति । तत्त्वाध्वं साङ्ख्यदर्शनमनुकरोति ।

साङ्ख्यदर्शनं वैदिकपरम्परायाः भित्तिस्तम्भम् अस्ति । ग्रन्थेऽस्मिन् प्रकृतिपुरुषौ सृष्टेः मूलकारणे इति प्रतिपादितौ । पञ्चविशतितत्त्वानां सम्यक् अवधारणं मोक्षकारणम् इति स्थिरीकृतम् अत्र ।

## सन्दर्भग्रन्थसूचीः


1. (https://en.wikipedia.org/wiki/Hindu_philosophy).
2. (http://iks.uok.edu.in/Files/3a963738-5d67-4444-aeba-edda77283c15/Journal/37ef7842-bb61-44f5-b480-16799c835691.pdf).
3. (http://indiafacts.org/heterogenity-in-darshana-across-bharat/)
4. (https://shaivism.net/articles/15.html).
5. (https://sreenivasaraos.com/2012/10/03/samkhya-part-three-samkhya-texts-and-samkhya-traditions/)
6. Jayaratha Rājānaka. *The Tantraloka of Abhinava Gupta*. The Indian Press, 1981.
7. Laxmanjoo Swāmi. *Kāshmiri Shaivism - The Secret Supreme*. Ishwar Ashram Trust, Ishber, Nishat, Srinagar, Kashmir.ISBN1-58721-506-3. 2003.
8. Laxmanjoo Swami. *Shiva Sūtras The Supreme Awakaning*. Universal Shaiva Fellowship, 10925 Stever Street, Culver City, CA - 90230, USA, ISBN: 1-75965-457-3. 2002.
9. Mishra Paramhanas. *Śrī Mālinī Vijayottaratantra.* Sampurnanda Sanskrit University, Varanasi, ISBN: 81-7270-047-4 2001.
10. Mishra Vachaspati. Udaseen Balram. *Samkhyakarika by the Great Sage Ishwara Krishna*. Guru Mandal Ashram Haridwar, 1931.
11. Paṇḍit BN. *Śivasūtra of Vāsugupta*. Ishwar Ashram Trust, Ishber, Nishat, Srinagar, Kashmir 2002.
12. Shastri Suryanarayana SS. The Samkhyakarika of Ishwara Krishna, University of Madras 1948.
13. Singh Jayadev. *Pratyabhijñāhṛdayam*. MLBD, New Delhi 1963.
14. Tripāthi. Achārya Sri Rāmaprasāda. *Rudrayamalam*. Sampūrnānda Sanskrit Viswavidyālaya, Varaṇasi 1991.